त्रैलोक्य मंगलात्मकं नाम लक्ष्मीस्तोत्रं

अथ त्रैलोक्य मंगलात्मकं नाम लक्ष्मीस्तोत्रप्रारंभः ।
नमः कल्याणदे देवि नमोऽस्तु हरिवल्लभे ।
नमो भक्तप्रिये देवि लक्ष्मीदेवि नमोऽस्तु ते ॥1॥

नमो मायागृहीतांगि नमोऽस्तु हरिवल्लभे ।
सर्वेश्वरि नमस्तुभ्यं लक्ष्मीदेवि नमोऽस्तु ते ॥2॥

महामाये विष्णुधर्मपत्नीरूपे हरिप्रिये ।
वांछादात्रि सुरेशानि लक्ष्मीदेवि नमोऽस्तुते ॥3॥

उद्यद्भानुसहस्राभे नयनत्रयभूषिते ।
रत्नाधारे सुरेशानि लक्ष्मीदेवि नमोऽस्तुते ॥4॥

विचित्रवसने देवि भवदुःखविनाशिनि ।
कुचभारनते देवि ! लक्ष्मीदेवि नमोऽस्तुते ॥5॥

साधकाभीष्टदे देवि अन्नदानरतेऽनघे ।
विष्ण्वानंदप्रदे मातर्लक्ष्मीदेवि नमोऽस्तु ते ॥6॥

षट्कोणपद्ममध्यस्थे षडंगयुवतीमये ।
ब्रह्माण्यादिस्वरूपे च लक्ष्मीदेवि नमोऽस्तु ते ॥7॥

देवि त्वं चंद्रवदने सर्वसाम्राज्यदायिनि ।
सर्वानंदकरे देवि लक्ष्मीदेवि नमोऽस्तु ते ॥8॥

पूजाकाले पठेद्यस्तु स्तोत्रमेतत्समाहितः ।
तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः ॥9॥

प्रातःकाले पठेद्यस्तु मंत्रपूजापुरःसरं ।
तस्य चान्नसमृद्धिः स्याद्वर्द्धमानो दिनेदिने ॥10॥

यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ।
प्रकाशात्कार्यहानिः स्यात्तस्माद्यत्नेन गोपयेत् ॥11॥

त्रैलोक्यमंगलं नाम स्तोत्रमेतत्प्रकीर्तितं ।
ब्रह्मविद्यास्वरूपंच महैश्वर्यप्रदायकं ॥12॥

पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यवान्भवेत् ।
यद्धृत्वा पठनाद्देवाः सर्वैश्वर्यमवाप्नुयुः ॥13॥

ब्रह्मा विष्णुश्च रुद्रश्च धारणात्पठनाद्यतः ।
सृजत्यवति हरत्येव कल्पेकल्पे पृथक्पृथक् ॥14॥

पुष्पांजल्यष्टकं देव्यै मूलेनैव पठेत्ततः ।
युगकालकृतायास्तु पूजायाः फलमाप्नुयात् ॥15॥

प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे ।
वाणी वक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः ॥16॥

अष्टोत्तरशतंचास्य पुरश्चर्याविधिः स्मृतः ॥17॥

भूर्जे विलिख्य गुलिकां स्वर्णस्थां धारयेद्यदि ।
कंठे वा दक्षिणे वाह्यौ सोऽपि सर्वतपोमयः ॥18॥

ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रं प्राप्य पार्वति ।
माल्यानि कौसुमान्येव भवंत्येव न संशयः ॥19॥

अस्यापि पठनात्सद्यः कुबेरोऽपि धनाधिपः ।
इंद्राद्याः सकला देवा धारणात्पठनाद्यतः॥

पुष्पांजल्यष्टकं देव्यै मूलेनैव सकृत्पठेत् ।
संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥21॥

यो धारयति पुण्यात्मा त्रैलोक्यमंगलं त्विदं ।
स्तोत्रंतु परमं पुण्यं सोऽपि पुण्यवतां वरः ॥22॥

सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् ।
पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा ।
ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतंति तं जनं ।
पठेद्वा धारयेद्वापि यो नरो भक्तितत्परः ॥24॥

एतत्तु स्तोत्रमज्ञात्वा योऽर्चयेज्जगदीश्वरीं ।
दारिद्र्यं परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात् ॥25॥

यः पठेत्प्रातरुत्थाय सर्वतीर्थफलं लभेत् ।
यः पठेदुभयोः संध्योत्तस्य विघ्नो न विद्यते ॥26॥

धारयेद्यः स्वदेहे तु तस्य विघ्नं न कुत्रचित् ।
भूतप्रेतपिशाचेभ्यो भयस्तस्य न विद्यते ॥27॥

रणे च राजद्वारे च सर्वत्र विजयी भवेत् ।
सर्वत्र पूजामाप्नोति देवीपुत्र इव क्षितौ ॥28 ॥
एतत्स्तोत्रं महापुण्यं धर्मकामार्थसिद्धिदं ।
यत्र तत्र न वक्तव्यं गोपितव्यं प्रयत्नतः ॥29॥

गोपितं सर्वतंत्रेषु सारात्सारं प्रकीर्तितं ।
सर्वत्र सुलभा विद्या स्तोत्रमेतत्सुदुर्लभं ॥30॥

शठाय भक्तिहीनाय निंदकाय महेश्वरि ।
न्यूनांगे अतिरिक्तांगे क्रूरे मिथ्याभिभाषिणे॥

यत्र तत्र न वक्तव्यं मया तु परिभाषितं ।
दत्वा तेभ्यो महेशानि नश्यंति सिद्धयः क्रमात् ॥32॥

मंत्राः पराङ्मुखा यांति शापं दत्वा सुदारुणं ।
अशुभंच भवेत्तस्य तस्माद्यत्नेन गोपयेत् ॥33॥

गोरोचनाकुंकुमेन भूर्जपत्रे महेश्वरि ।
लिखित्वा शुभयोगे च ब्रह्मेंद्रौ वैधृतौ यथा॥

कुमारीं पूजयित्वा तु देवीसूक्तं निवेद्य च ।
पठित्वा भोजयेद्विप्रांधनवान्वेदपारगान् ॥35॥

मासमेकं पठेद्यस्तु प्रत्यहं नियतः शुचिः ।
दिवा भवेद्धविष्याशी रात्रौ भक्तिपरायणः ।
तस्य सर्वार्थसिद्धिः स्यात् सत्यंसत्यं महेश्वरि ॥37॥

षट्सहस्रप्रमाणेन प्रत्यहं प्रजपेत्सदा ।
षण्मासैर्वा त्रिभिर्मासैः खेचरोभवति ध्रुवं ॥38॥

अपुत्रो लभते पुत्रमधनो धनवान्भवेत् ।
अरोगी बलवांस्तस्य राजा च दासतामियात् ॥39॥

य एवं कुरुते धीमान्स एव कमलापतिः ।
स एव श्रीमहादेवस्तस्य पत्नी हरिप्रिया ॥40॥

बहुना किमिहोक्तेन स्तवस्यास्य प्रसादतः ।
धर्मार्थकाममोक्षंच लभते नात्र संशयः ॥41॥

इति ते कथितं देवि त्रैलोक्यमंगलाभिधं ।
लक्ष्मीस्तोत्रं महापुण्यं संसारार्णवतारकं ॥42॥

ऋजवे सुचरित्राय विष्णुभक्तिपराय च ।
दातव्यंच प्रयत्नेन परमं गोपनं त्विदं ॥43॥

॥इति श्रीशंकरभाषितं त्रैलोक्यमंगलनामकलक्ष्मीस्तोत्रं संपूर्णं ।